मसिनं, क्ली, ( मस्यते परिमीयते गणनयेति । मस् + "बहुलमन्यत्रापि ।" उणा० २ । ४६ । इति इनच् ।) सपिण्डकम् २ । इत्युणादिकोषः ॥

मसिपण्यः, पुं, ( मसिः काली पण्यमस्य । ) लेखकः । इति त्रिकाण्डशेषः ॥

मसिप्रसूः, स्त्री, (मसिं प्रकर्षेण सूते उद्गिरतीति । प्र + सू + क्विप् । ) मस्याधारः । इति हारावली ॥ लेखनी । इति केचित् ॥

मसिमणिः, स्त्री, ( मस्याधारो मणिरिवेति । ) मस्याधारः । इति शब्दरत्नावली ॥

मसिवर्द्धनं, क्ली, ( मसिं वर्द्धयतीति । वृध् + णिच् + ल्युः । ) रसगन्धः । इति त्रिकाण्डशेषः ॥

मसी, स्त्री, ( मसि + कृदिकारादिति ङीष् । ) काली । ( यथा, नैषधचरिते । ६ । ६१ ।

"त्वदास्य निर्य्यन्मदलीकदुर्यशो-
मसीमयं वक्तिपिरूपभागिव ।" )

शेफालिकावृन्तम् । इति शब्दरत्नावली ॥

मसीजलं, क्ली, ( मस्या जलम् । राहोः शिर इतिवत् अभेदे षष्ठी । ) मसी । काली । इति त्रिकाण्डशेषः ॥

मसीधानी, स्त्री, ( मस्या धानी पात्रम् । ) मस्याधारः । इति त्रिकाण्डशेषः ॥

मसीना, स्त्री, ( मस् + "बहुलमन्यत्रापि ।" उणा० २ । ४६ । इति । इनच् । पृषोदरादित्वाद्दीर्घः । स्त्रियां टाप् । ) स्वनामख्यातशस्यम् । यथा, शब्दचन्द्रिकायाम् ।

"मसीना चातसी चिह्ना क्षुमोमामालिका
मिता ।"

मसुरः, पुं, ( मस्यते परिमीयतेऽसौ । मस् + "मसेश्च ।" उणा० १ । ४४ । इति । उरन् । ) मसूरकलायः । इति त्रिकाण्डशेषः ॥

मसुरा, स्त्री, ( मस्यति पण्यत्वेन परिणमत्यथावेति । मस् + उरन् । स्त्रियां टाप् । ) वेश्या । व्रीहिप्रभेदः । इति मेदिनी । रे, २०१ ॥

मसूरः, पुं स्त्री, ( मस्यते परिमीयतेऽसौ । मस् + "मसेरूरन् ।" उणा० ५ । ३ । इति ऊरन् । ) व्रीहिभेदः । मसुरी कलाइ इति भाषा ॥ ( अस्याधिपतिर्मेषराशिः । यथा, बृहत्संहितायाम् । ४१ । २ ।

"वस्त्राविककुतुपानां
मसूरगोधूमरालकयवानाम् ।
स्थलसम्भवौषधीनां
कनकस्य च कीर्त्तितो मेषः ॥")

तत्पर्य्यायः । मङ्गल्यकः २ । इत्यमरः । २ । ९ । १७ ॥ मसुरः ३ व्रीहिकाञ्चनः ४ । इति त्रिकाण्डशेषः ॥ मसूरा ५ मसुरा ६ । इति मेदिनी । रे, २०१ ॥ रागदालिः ७ मङ्गल्यः ८ पृथुबीजकः ९ शूरः १० कल्याणबीजः ११ गुरुबीजः १२ मसूरकः १३ । इति राजनिर्घण्टः ॥ मङ्गल्या १४ मसूरका १५ । इति भावप्रकाशः ॥ अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । संग्राहित्वम् । कफपित्तनाशित्वम् । वातामयकरत्वम् । मूत्रकृच्छ्रहरत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥ अस्रहरत्वम् । रूक्षत्वम् । ज्वरनाशित्वञ्च । इति भावप्रकाशः ॥ तस्य यूषगुणाः । संग्राहित्वम् । स्वादुपाकित्वम् । प्रमेहपित्तश्लेष्मज्वरातीसारनाशित्वञ्च । इति राजनिर्घण्टः ॥

मसूरकः, पुं, (मसूर इव प्रतिकृतिरिति । मसूर + कन् । संज्ञायां कन् वा । ) उपबर्हविशेषः । गोल बालिश इति भाषा । तत्पर्य्यायः । चतुरः २ चातुरः ३ अङ्क्तिः ४ चक्रगण्डुः ५ । इति शब्दरत्नावली ॥ ( क्लीवेऽपि दृश्यते । यथा, बृहत्संहितायाम् । ४३ । ४३ ।

"अष्टाश्रि नीलरक्तं
तृतीयमिन्द्रेण भूषणं दत्तम् ।
असितं यमश्चतुर्थं
मसूरकं कान्तिमदयच्छत् ॥")

मसूरविदला, स्त्री, ( मसूरस्येव विशिष्टं दलमस्याः । स्त्रियां टाप् । ) कृष्णत्रिवृत् । इत्यमरः । २ । ४ । १०६ ॥ ( यथा, राजतरङ्गिण्याम् । ६ । १८७ ।

"मसूरविदलाकारलूताक्लिन्नकलेवरः ।
पौषे चाब्दे चतुस्त्रिंशे नवमेऽब्दे सिते मृतः ॥")

श्यामलता । इति रत्नमाला ॥

मसूरा, स्त्री, ( मस्यति परिणमतीति । मस् + ऊरन् । स्त्रियां टाप् ।) वेश्या । मसूरकलायः । इति मेदिनी । रे, २०१ ॥

मसूरिका, स्त्री, (मसूरेव । मसूरा + कन् । स्त्रियां टाप् । अत इत्वञ्च । ) कुट्टनी । इति शब्दमाला ॥ * ॥ वसन्तरोगः । तस्योत्पादनक्रिया टीका इति ख्याता । सा तु गोस्तनज-नरशायज-मसूरिकापूयेन भवति । यथा,—

"धेनुस्तन्यमसूरिका नराणाञ्च मसूरिका ।
तज्जलं बाहुमूलाच्च शस्त्रान्तेन गृहीतवान् ॥
बाहुमूले च शस्त्राणि रक्तोत्पत्तिकराणि च ।
तज्जलं रक्तमिलितं स्फोटकज्वरसम्भवम् ॥"

इति धन्वन्तरिकृतशाक्तेयग्रन्थः ॥

तत्पर्य्यायः । पापरोगः २ रक्तवटी ३ मसूरी ४ । इति शब्दरत्नावली ॥ * ॥ अथ मसूरिकाधिकारः । "तत्र मसूरिकाविप्रकृष्टनिदानपूर्व्विकां संप्राप्तिमाह ।

'कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः ।
दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः ॥
क्रूरग्रहेक्षणाच्चापि देशे दोषाः समुद्गताः ।
जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः ॥
मसूराकृतिसंस्थानाः पिडकाः स्युर्मसूरिकाः ॥'

चादौ यवक्षारः । विरुद्धाध्यशनाशनैः कट्वादिविरुद्धान्तानामशनैः । अथ च अध्यशनाशनं अधिकमशनं अध्यशनम् । दुष्टनिष्पावशाकाद्यैः दुष्टैर्निष्पावशाकाद्यैः । आद्यशब्दाम्भ्वालुकादितैः । प्रदुष्टपवनोदकैः सविषकुसुमादिसंसर्गात् क्रूरग्रहेक्षणाच्चापि देशे देशे क्रूरग्रहा राहुशनैश्चराद्यस्तेषामीक्षणाद्दृष्टेः यस्मिन् देशे क्रूरग्रहदृष्टिः तत्रापि मसूरिकोत्पत्तिरित्यर्थः । मसूराकृतिसंस्थानाः मसूरस्य या आकृतिस्तद्वत् संस्थानमाकृतिर्यासां ताः ॥ * ॥ अथ पूर्व्वरूपमाह ।

'तासां पूर्व्वं ज्वरः कण्डूर्गात्रभङ्गोऽरतिर्भ्रमः ।
त्वचि शोथः सवैवर्ण्यो नेत्ररागस्तथैव च ॥'

वातजामाह ।

'स्फोटाः श्यावारुणा रूक्षास्तीव्रवेदनया-
न्विताः ।
कठिनाश्चिरपाकाश्च भवन्त्यनिलसम्भवाः ॥
सन्ध्यस्थिपर्व्वणां भेदः कासः कम्पोऽरतिर्भ्रमः ।
शोषस्ताल्वोष्ठजिह्वानां तृष्णा चारुचिसंयुता ॥'

पैत्तिकामाह ।

'रक्ताः पीताः सिताः स्फोटाः सदाहास्तीव्र-
वेदनाः ।
भवन्त्यचिरपाकाश्च पित्तकोपसमुद्भवाः ॥
विड्भेदश्चाङ्गमर्द्दश्च दाहस्तृष्णारुचिस्तथा ।
मुखपाकोऽक्षिपाकश्च ज्वरस्तीव्रः सुदारुणः ॥'

रक्तजामाह ।

'रक्तजायां भवन्त्येते विकाराः पित्तलक्षणाः ॥'

अथ कफजामाह ।

'श्वेताः स्निग्धाः भृशं स्थूलाः कण्डुरा मन्द-
वेदनाः ।
मसूरिकाः कफोद्भूताश्चिरपाकाः प्रकीर्त्तिताः ॥
कफप्रसेकः स्तैमित्यं शिरोरुग्गात्रगौरवम् ।
हृल्लासः सारुचिर्निद्रा तन्द्रालस्यसमन्विताः ॥'

सान्निपातिकीमाह ।

'नीलाश्चिपिटविस्तीर्णा मध्ये निम्ना महारुजः ।
पूतिस्रावाश्चिरं पाकाः प्रभूताः सर्व्वदोषजाः ॥'

सप्तधातुगतामाह ।

'मसूरिकास्त्वचं प्राप्तास्तोयबुद्बुदसन्निभाः ।
स्वल्पदोषाः प्रजायन्ते भिन्नास्तोयं स्रवन्ति च ॥'

त्वचं प्राप्ताः त्वक्छब्देनात्र रस उच्यते रसाश्रयत्वात् ॥ * ॥ रक्तस्थामाह ।

'रक्तस्था लोहिताकाराः शीघ्रपाकास्तनुत्वचः ।
साध्या नात्यर्थदुष्टास्तु भिन्ना रक्तं स्रवन्ति च ॥'

साध्या रक्तस्था इत्यर्थः । नात्यर्थदुष्टास्तु अत्यर्थदुष्टशोणिताः पुनर्न साध्याः किन्तु कष्टसाध्याः ॥ * ॥ मांसस्थामाह ।

'मांसस्थाः कठिनाः स्निग्धाश्चिरपाकास्तनु-
त्वचः ।
गात्रशूलानिशं कण्डूर्ज्वरोदाहतृषान्विताः ॥'

मेदस्थामाह ।

'मेदोजा मण्डलाकारा मृदवः किञ्चिदुन्नताः ।
घोरज्वरपरीताश्च स्थूलाः स्निग्धाः सवेदनाः ।
सम्मोहारतिसन्तापाः कश्चिदाभ्यो विनिस्तरेत् ॥'

अस्थिमज्जागते प्राह ।

'क्षुद्रा गात्रसमा रूक्षाश्चिपिटाः किञ्चिदुन्नताः ।
मज्जस्था भृशसम्मोहवेदनारतिसंयुताः ॥
भ्रमरेणेव विद्धानि कुर्व्वन्त्यस्थीनि सर्व्वतः ।
छिन्दन्ति मर्म्मधामानि प्राणानाशु हरन्ति ताः ॥'

गात्रसमाः गात्रतुल्यवर्णाः । चिपिटाः चिपिटाकाराः । मज्जाग्रहणेनास्थ्नोऽपि ग्रहणं